श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

सुण्डपालयं श्रीरामभद्राचार्य विरचिता

# ॥ श्री श्रीनिवासमहादेशिक अष्टोत्तरशतनामावलिः ॥
# (पॆरियाण्डवन् अष्टोत्तरशतनामावलिः)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासमहादेशिक अष्टोत्तरशतनामावलिः ॥

| | |
|---|---|
| **1** | ओं श्रीमते नमः |
| **2** | ओं योगीश्वराय नमः |
| **3** | ओं दिव्यशरीराय नमः |
| **4** | ओं साधुवत्सलाय नमः |
| **5** | ओं श्रीरङ्गवासरसिकाय नमः |
| **6** | ओं श्रितार्तिच्छिदे नमः |
| **7** | ओं गुणाकराय नमः |
| **8** | ओं सर्वभूतसुहृदे नमः |
| **9** | ओं शान्ताय नमः |
| **10** | ओं सानुक्रोशाय नमः |
| **11** | ओं जितेन्द्रियाय नमः |
| **12** | ओं निर्ममाय नमः |
| **13** | ओं निरहङ्काराय नमः |
| **14** | ओं निर्मलज्ञानवते नमः |
| **15** | ओं शुचये नमः |

| | |
|---|---|
| **16** | ओं सर्वसङ्गपरित्यागिने नमः |
| **17** | ओं समलोष्टाश्मकाञ्चनाय नमः |
| **18** | ओं परमहंसपतये नमः |
| **19** | ओं तीर्थपादाय नमः |
| **20** | ओं पावनदर्शनाय नमः |
| **21** | ओं भाष्यप्रवचनस्वान्ताय नमः |
| **22** | ओं भाष्यकारापराकृतये नमः |
| **23** | ओं वेदान्ताब्धितलस्पर्शिने नमः |
| **24** | ओं वेदान्तोक्त्यैककण्ठ्यकृते नमः |
| **25** | ओं भक्तानुकम्पिने नमः |
| **26** | ओं भावज्ञाय नमः |
| **27** | ओं भगवद्भक्तसादराय नमः |
| **28** | ओं शिष्यकल्पतरवे नमः |
| **29** | ओं स्वामिने नमः |
| **30** | ओं शिष्यशिक्षाविशारदाय नमः |
| **31** | ओं द्राविडाम्नाय तत्वज्ञाय नमः |
| **32** | ओं दृढचित्ताय नमः |
| **33** | ओं दुरासदाय नमः |

| | |
|---|---|
| **34** | ओं वैराग्यशेवधये नमः |
| **35** | ओं ज्ञात्रे नमः |
| **36** | ओं वैकुण्ठपदमानसाय नमः |
| **37** | ओं तृणीकृतसुरैश्वर्याय नमः |
| **38** | ओं त्रिदण्डिने नमः |
| **39** | ओं सोर्ध्वपुण्ड्राय नमः |
| **40** | ओं वेदान्तदेशिकपदद्वन्द्व संसक्त मानसाय नमः |
| **41** | ओं शतदूषणीदक्षाय नमः |
| **42** | ओं चण्डमारुतपण्डिताय नमः |
| **43** | ओं तत्वज्ञानोपदेष्ट्रे नमः |
| **44** | ओं तत्वटीकाविशारदाय नमः |
| **45** | ओं साक्षात्स्वामिप्रबन्धप्राणाय नमः |
| **46** | ओं श्रीमद्गोपालदेशिक ग्रन्थजीवनाय नमः |
| **47** | ओं रहस्यत्रयसारज्ञाय नमः |
| **48** | ओं राजीवसमलोचनाय नमः |
| **49** | ओं पराशरमताभिज्ञाय नमः |
| **50** | ओं पाराशर्यमुदवहाय नमः |
| **51** | ओं शुकशौनक सङ्काशाय नमः |

| | |
|---|---|
| **52** | ओं श्रीविभुत्वप्रसाधकाय नमः |
| **53** | ओं वेदप्रामाण्य निर्वोढ्रे नमः |
| **54** | ओं श्रीवैदिकाचारसाधकाय नमः |
| **55** | ओं देवतापारमार्थ्यज्ञाय नमः |
| **56** | ओं द्वन्द्वातीताय नमः |
| **57** | ओं विमत्सराय नमः |
| **58** | ओं बौद्धविध्वंसनाय नमः |
| **59** | ओं साङ्ख्यसमयद्रुहे नमः |
| **60** | ओं बहुश्रुताय नमः |
| **61** | ओं क्षीणीकृतकणादाध्वने नमः |
| **62** | ओं पाषण्डमतखण्डनाय नमः |
| **63** | ओं चार्वाकमतच्छेत्रे नमः |
| **64** | ओं छिन्नपाशुपतागमाय नमः |
| **65** | ओं जैमिन्याशयज्ञाय नमः |
| **66** | ओं जैनमतभिदे नमः |
| **67** | ओं कौमारिलाध्वच्छिदे नमः |
| **68** | ओं विशिष्टाद्वैत सिद्धान्तस्थापकाय नमः |
| **69** | ओं ब्रह्मवित्तमाय नमः |

| | |
|---|---|
| **70** | ओं पाञ्चरात्रप्रतिष्ठापकाय नमः |
| **71** | ओं पण्डितीकृतपामराय नमः |
| **72** | ओं पञ्चसंस्कारकल्पज्ञाय नमः |
| **73** | ओं पञ्चकाल परायणाय नमः |
| **74** | ओं श्रीमुनित्रयसिद्धान्तस्थापकाय नमः |
| **75** | ओं शिष्टसेविताय नमः |
| **76** | ओं सत्सम्प्रदाय निर्वोढ्रे नमः |
| **77** | ओं सर्वाचार्याशयविदे नमः |
| **78** | ओं कूलङ्कषमतये नमः |
| **79** | ओं प्राज्ञाय नमः |
| **80** | ओं कुम्भपुष्पसमुद्भवाय नमः |
| **81** | ओं शिष्यीकृतानेकयतये नमः |
| **82** | ओं शिष्यबृन्दवृताय नमः |
| **83** | ओं प्रपत्तिशास्त्रमर्मज्ञाय नमः |
| **84** | ओं प्रख्यातमहिमार्णवाय नमः |
| **85** | ओं गीताचार्याशयज्ञाय नमः |
| **86** | ओं गीताभाष्यसारविदे नमः |
| **87** | ओं गोप्तृत्ववरणज्ञाय नमः |

| | |
|---|---|
| **88** | ओं कार्पण्यशोधकाय नमः |
| **89** | ओं तीव्रविश्वास निर्णेत्रे नमः |
| **90** | ओं उपायत्वप्रार्थनास्वरूपज्ञाय नमः |
| **91** | ओं न्यासानुष्ठान निस्तुलाय नमः |
| **92** | ओं श्रेयोनिधये नमः |
| **93** | ओं उदारात्मने नमः |
| **94** | ओं मुक्तीकृत बहुप्रजाय नमः |
| **95** | ओं ख्यातिलाभसपर्याद्विषे नमः |
| **96** | ओं नैकशास्त्रविशारदाय नमः |
| **97** | ओं मीमांसापादुकाभिज्ञाय नमः |
| **98** | ओं महातेजसे नमः |
| **99** | ओं महामनसे नमः |
| **100** | ओं निस्तन्द्राय नमः |
| **101** | ओं सदाग्रन्थकालक्षेपकुतूहलाय नमः |
| **102** | ओं विप्रलम्भविदेशीयाय नमः |
| **103** | ओं पुण्यश्लोकाय नमः |
| **104** | ओं पुराणविदे नमः |
| **105** | ओं कृतीकृतकलये नमः |

| | |
|---|---|
| **106** | ओं कीर्तिपवित्रीकृत भूतलाय नमः |
| **107** | ओं पूर्वाचार्याध्वपरिष्कर्त्रे नमः |
| **108** | ओं पूर्णसंन्यासलक्षणाय नमः |
| **109** | ओं सर्वज्ञाय नमः |
| **110** | ओं संयमिश्रेष्ठाय नमः |
| **111** | ओं देशिकेन्द्राय नमः |
| **112** | ओं दयानिधये नमः |
| **113** | ओं ज्ञानवैराग्यानुष्ठानशेवधये श्रीमते श्रीनिवासमहादेशिकाय नमः |

॥ इति श्री श्रीनिवासमहादेशिक अष्टोत्तरशतनामावलिः समाप्ता ॥